# Ramashtakam 5

# રામાષ્ટકમ્ ૫

## Document Information

Text title : Ramashtakam 5

File name : rAmAShTakam5.itx

Category : raama, aShTaka

Location : doc_raama

Author : Murari Gupta

Proofread by : PSA Easwaran

Description/comments : From the book Krishna Chaitanya Charita

Latest update : February 22, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# રામાષ્ટકમ્ ૫

રાજત્કિરીટમણિદીધિતિદીપિતાંશં
 ઉદ્યદ્બૃહસ્પતિકવિપ્રતિમે વહન્તમ્ ।
દ્વે કુણ્ડલેઽઙ્કરહિતેન્દુસમાનવક્ત્રં
 રામં જગત્ત્રયગુરું સતતં ભજામિ ॥ ૧॥

ઉદ્યદ્વિભાકરમરીચિવિબોધિતાબ્જ-
 નેત્રં સુબિમ્બદશનચ્છદચારુનાસમ્ ।
શુભ્રાંશુરશ્મિપરિનિર્જિતચારુહાસં
 રામં જગત્ત્રયગુરું સતતં ભજામિ ॥ ૨॥

તં કમ્બુકણ્ઠમજમમ્બુજતુલ્યરૂપં
 મુક્તાવલીકનકહારધૃતં વિભાન્તમ્ ।
વિદ્યુદ્બલાકગણસંયુતમમ્બુદં વા
 રામં જગત્ત્રયગુરું સતતં ભજામિ ॥ ૩॥

ઉત્તાનહસ્તતલસંસ્થસહસ્રપત્રં
 પઞ્ચચ્છદાધિકશતં પ્રવરાઙ્ગુલીભિઃ ।
કુર્વત્યશીતકનકદ્યુતિ યસ્ય સીતા
 પાર્શ્વેઽસ્તિ તં રઘુવરં સતતં ભજામિ ॥ ૪॥

અગ્રે ધનુર્ધરવરઃ કનકોજ્જ્વલાઙ્ગો
 જ્યેષ્ઠાનુસેવનરતો વરભૂષણાઢ્યઃ ।
શેષાખ્યધામવરલક્ષ્મણનામ યસ્ય
 રામં જગત્ત્રયગુરું સતતં ભજામિ ॥ ૫॥

યો રાઘવેન્દ્રકુલસિન્ધુસુધાંશુરૂપો
 મારીચરાક્ષસસુબાહુમુખાન્ નિહત્ય ।
યજ્ઞં રરક્ષ કુશિકાન્વયપુણ્યરાશિં
 રામં જગત્ત્રયગુરું સતતં ભજામિ ॥ ૬॥

હત્વા ખરત્રિશિરસૌ સગણૌ કબન્ધં
    શ્રીદણ્ડકાનનમદૂષણમેવ કૃત્વા ।
સુગ્રીવમૈત્રમકરોદ્વિનિહત્ય શત્રું
    તં રાઘવં દશમુખાન્તકરં ભજામિ ॥ ૭॥

ભઙ્ક્ત્વા પિનાકમકરોજ્જનકાત્મજાયા
    વૈવાહિકોત્સવવિધિં પથિ ભાર્ગવેન્દ્રમ્ ।
જિત્વા પિતુર્મુદમુવાહ કકુત્સ્થવર્યં
    રામં જગત્ત્રયગુરું સતતં ભજામિ ॥ ૮॥

ઇતિ મુરારી ગુપ્તાવિરચિતં રામાષ્ટકં સમ્પૂર્ણમ્ ।

*Ramashtakam 5*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*